अथ क्षुद्रमत्स्यगुणाः ।
"क्षुद्रमत्स्याः स्वादुरसा दोषत्रयविनाशनाः ।
लघुपाका रुचिकराः सर्व्वदा ते हिता मताः ।
अथातिक्षुद्रमत्स्यगुणाः ।
अतिसूक्ष्माः पुंस्त्वहरा रुच्याः कासानिलापहाः ।
अथ मत्स्याण्डगुणाः ।
मत्स्यगर्भो भृशं वृष्यः स्निग्धः पुष्टिकरो गुरुः ।
कफमेदप्रदो बल्यो ग्लानिकृन्मेहनाशनः ॥
अथ शुष्कमत्स्यगुणाः ।
शुष्कमत्स्या न बल्याः स्युर्दुर्जरा विड्विबन्धिनः ॥
अथ दग्धमत्स्यगुणाः ।
दग्धमत्स्यो गुणैः श्रेष्ठः पुष्टिशुक्रबलवर्द्धनः ॥
अथ कूपजादिमत्स्यगुणाः ।
कूपमत्स्याः शुक्रमूत्रकुष्ठश्लेष्मविवर्द्धनाः ।
सरोजा मधुराः स्निग्धा बल्या वातविनाशनाः ॥
नादेया बृंहणा मत्स्या गुरवोऽनिलनाशनाः ।
रक्तपित्तकरा वृष्याः स्निग्धोष्णाः स्वल्पवर्च्चसः ॥
चौण्ड्याः पित्तहराः स्निग्धा मधुरा लघवो
हिमाः ।
ताड़ागा गुरवो वृष्याः शीतला बलमूत्रदाः ।
ताड़ागवन्निर्झरजा बलायुर्मतिदक्कराः ॥
अथ ऋतुविशेषे मत्स्यविशेषगुणः ।
हेमन्ते कूपजा मत्स्याः शिशिरे सारसा हिताः ।
वसन्ते ते तु नादेया ग्रीष्मे चौण्ड्यसमुद्भवाः ॥
तड़ागजाता वर्षासु तास्तु पथ्या नदीभवाः ।
निर्झराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ॥"
इति भावप्रकाशः ॥

मत्स्योत्पत्तिकारणं यथा,—
"ततस्तु मित्रावरुणौ भ्रातरौ ब्रह्मचारिणौ ।
तन्तु देशं गतौ देवौ विचरन्तौ यदृच्छया ॥
ताभ्यां तत्र तदा दृष्टा उर्व्वशी तु वराप्सराः ।
ध्यायन्ती सहितान्याभिः सखीभिः सा वरानना ॥
गायन्ती च हसन्ती च विश्वस्ता निर्जने वने ॥
गौरी कमलगर्भाभा स्निग्धकृष्णशिरोरुहा ।
पद्मपत्रविशालाक्षी रक्तोष्ठी मृदुभाषिणी ॥
शङ्खकुन्देन्दुधवलैर्दन्तैरविरलैः समैः ।
सुभ्रूः सुनासा सुमुखी सुललाटा मनस्विनी ॥
सिंहवत् क्षाममध्याङ्गी पीनोरुजघनस्तनी ।
मधुरालापचतुरा सुमध्या चारुहासिनी ॥
रक्तोत्पलकरा तन्वी सुपदी विनयान्विता ।
पूर्णचन्द्रनिभा बाला मत्तद्विरदगामिनी ॥
दृष्ट्वा तस्यास्तु तद्रूपं तौ देवौ विस्मयं गतौ ।
यस्या हास्येन लास्येन स्मितेन ललितेन च ॥
मृदुना वायुना चैव शीतानिलसुगन्धिना ।
मत्तभ्रमरगीतेन पुंस्कोकिलरुतेन च ॥
सुस्वरेण हि गीतेन उर्व्वश्या मधुरेण च ।
ईक्षितौ च कटाक्षेण स्कन्दशुक्रावुभावपि ॥
तत्सन्निधौ पतितं रेतः कमलेऽथ स्थले जले ।
कमलेऽथ वशिष्ठस्तु जातो हि मुनिसत्तमः ॥
स्थले त्वगस्त्यः सम्भूतो जले मत्स्यो महामते ! ॥"
इति नारसिंहपुराणे ६ अध्यायः ॥

मत्स्यभक्षणनिषेधो यथा,—
"यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्यादः सर्व्वमांसादस्तस्मान्मत्स्यान् विवर्ज्जयेत् ॥
इति मानवे ५ अध्यायः ॥
जलस्थलचरा ये च प्राणिनस्तान् मृतानपि ।
न भक्षेन्मानवो ज्ञानी हन्ता तेषां भवेन्न हि ॥
हत्वा हत्वा तु मत्स्याशी सर्व्वेषां यो विशेषतः ।
मांसादः प्राणिनां सोऽपि तस्मान्मत्स्यं परित्यजेत् ॥"
इति पाद्मोत्तरखण्डे १०५ अध्यायः ॥

वर्ज्जनीयमत्स्या यथा,—
"शृणु देवि ! प्रवक्ष्यामि मांसभेदान्निबोध मे ।
नादेयं तिक्तकमठं पशुशृङ्गिणमेव च ॥
गोमीनं चक्रशकुलं वड़ालं राघवं तथा ।
वामीनं चलकर्णञ्च सचक्रं पेङ्गमेव च ॥
भूविलाशनिरुद्धञ्च गाङ्गेयानि विवर्ज्जयेत् ॥"
इति मत्स्यसूक्तमहातन्त्रम् ॥

रविवारे मत्स्यभक्षणनिषेधो यथा,—
"आमिषं रक्तशाकञ्च यो भुङ्क्ते च रवेर्दिने ।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥"
इति भविष्यपुराणम् ॥
"माषमामिषमांसञ्च मसूरं निम्बपत्रकम् ।
भक्षयेद् यो रवेर्वारे सप्तजन्मान्यपुत्रकः ॥"
इति तिथ्यादितत्त्वम् ॥

कार्त्तिके मत्स्यभक्षणनिषेधो यथा,—
"न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि ।
चण्डालो जायते राजन् ! कार्त्तिके मांसभक्ष-
णात् ॥"
इति नारदीयपुराणम् ॥

माघवैशाखयोर्हविष्यब्रह्मचर्य्यविधानात् मत्स्य-
भक्षणं नितरां निषिद्धमिति कृत्यतत्त्वदर्शनात् ॥
जन्मतिथौ मत्स्यभक्षणनिषेधो यथा,—
"आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ॥"
अपि च ।
"भुङ्क्ते यस्तु निरामिषं स हि भवेज्जन्मान्तरे
पण्डितः ॥"
इति तिथ्यादितत्त्वम् ॥

शैवस्य मत्स्यभक्षणनिषेधो यथा,—
"क्व मद्यं क्व शिवे भक्तिः क्व मांसं क्व शिवार्च्चनम् ।
मत्स्यमांसरतानां वै दूरे तिष्ठति शङ्करः ॥"
इति काशीखण्डम् ॥

मा भक्ष्यं नैवेद्यार्थे भक्ष्येष्वजामहिषीक्षीरं वर्ज-
येत् । पञ्चनखमत्स्यवराहमांसानि च । इत्या-
ह्निकतत्त्वधृतविष्णुसूत्रम् ॥ * ॥ विन्ध्यपर्व्वतस्य
पश्चिमे मत्स्यभक्षणनिषेधो यथा,—
"विन्ध्यस्य पश्चिमे भागे मत्स्यभुक् पतितो नरः ।"
इति पुराणम् ॥

कामतो मत्स्यभक्षणप्रायश्चित्तं यथा,—
"मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं
वसेत् ॥"
अज्ञानतस्तदर्द्धम् । इति प्रायश्चित्तविवेकः ॥

मत्स्यभक्षणप्रतिप्रसवो यथा,—
"मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव
च ।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा ॥
सफरं सिंहतुण्डञ्च तथा पाठीन-रोहितौ ।
मत्स्यास्त्वेते समुद्दिष्टा भक्षणाय तपोधनैः ॥
प्रोक्षितं भक्षयेदेषां मांसञ्च द्विजकाम्यया ।
यथाविधिनियुक्तञ्च प्राणानामपि चात्यये ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
अपि च ।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः ॥"
इति मानवे ५ अध्यायः ॥
"अनिवेद्य न भोक्तव्यं मत्स्यं मांसञ्च यद्भवेत् ।
अन्नं विष्ठा पयो मूत्रं यद्विष्णोरनिवेदितम् ॥"
इत्याह्निकतत्त्वम् ॥

प्रेतश्राद्धे मत्स्यदानविधिर्यथा,—
"सपिण्डीकरणं यावत् प्रेतश्राद्धन्तु षोड़शम् ।
पक्वान्नेनैव कर्त्तव्यं सामिषेण द्विजातिभिः ॥"
इति श्राद्धतत्त्वधृतकामधेनुवचनम् ॥

मत्स्यः, पुं, ( जलं प्राप्य माद्यतीति मद् +
"ऋतन्यञ्जीति ।" उणा० । ४।२ । इति स्यन् ।)
मीनविशेषः । विराटदेशः । नारायणः । इति
हेमचन्द्रः ।४।४०१ ॥ देशविशेषे बहुवचनान्तः ।
इति मेदिनी । ये, ४५ ॥ द्वादशराशिः । यथा,
"मत्स्यौ घटी नृमिथुनं सगदं सवीणम् ॥"
इत्यादि ज्योतिस्तत्त्वम् ॥
अष्टादशपुराणान्तर्गतपुराणविशेषः ॥ (मत्स्य-
रूपेणावतीर्णेन भगवता उक्तत्वात् अस्य
तदाख्या ।) यथा,—
"पुण्यं पवित्रमायुष्यमिदानीं शृणुत द्विजाः ।
मात्स्यं पुराणमखिलं यज्जगाद गदाधरः ॥"
इति मत्स्यपुराणे १ अध्यायः ॥
दशावतारान्तर्गतप्रथमावतारः । यथा,—
सूत उवाच ।
"पुरा राजा मनुर्नाम चीर्णवान् विपुलं तपः ।
पुत्त्रे राज्यं समारोप्य क्षमावान् रविनन्दनः ॥
मलयस्यैकदेशे तु सर्व्वात्मगुणसंयुतः ।
समदुःखसुखो वीरः प्राप्तवान् योगमुत्तमम् ॥
बभूव वरदश्चास्य वर्षायुतशते गते ।
वरं वृणीष्व प्रोवाच प्रीतः स कमलासनः ॥
एवमुक्तोऽब्रवीद्राजा प्रणम्य स पितामहम् ।
एकमेवाहमिच्छामि त्वत्तो वरमनुत्तमम् ॥
भूतग्रामस्य सर्व्वस्य स्थावरस्य चरस्य च ।
भविता रक्षणे यत्नं प्रलये समुपस्थिते ॥
एवमस्त्विति विश्वात्मा तत्रैवान्तरधीयत ।
पुष्पवृष्टिश्च महती खात् पपात सुरार्पिता ॥
कदाचिदाश्रमे तस्य कुर्व्वतः पितृतर्पणम् ।
पपात पाण्योरुपरि शफरी जलसंयुता ॥
दृष्ट्वा तच्छफरीरूपं स दयालुर्महीपतिः ।
रक्षणायाकरोद्यत्नं स तस्मिन् करकोदरे ॥
अहोरात्रेण चैकेन षोड़शाङ्गुलविस्तृतः ।
सोऽभवन्मत्स्यरूपेण पाहि पाहीति चाब्रवीत् ॥
स तमादाय मणिके प्राक्षिपज्जलचारिणम् ।
तत्रापि चैकरात्रेण हस्तत्रयमवर्द्धत ॥